**आदर्शप्रश्नपत्रम्**

संस्कृतसाहित्यम् (Sanskrit) (248)

**परीक्षासमयावधिः (Time) होरात्रयम् (3Hrs)** **पूर्णाङ्काः (Full Marks) - 100**

**निर्देशाः -**

1) अस्मिन् प्रश्नपत्रे [A] भागे 20, [B] भागे 6, [C] भागे 6, [D] 5, [E] भागे 5 इति आहत्य 51 प्रश्नाः सन्ति।
2) समे प्रश्ना अनिवार्याः। तत्र वैकल्पिकभागेषु एकः एव समाधेयः।
3) प्रत्येकं प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःxप्रश्नाः=पूर्णाङ्काः) इति अङ्काः दीयन्ते।
4) A भागे प्र.सं. 1 तः 20 पर्यन्तं – बहुविकल्पप्रकारस्य प्रश्नाः (MCQs) येषु प्रत्येकं एकः अंकः भवति। एतेषु प्रत्येकस्मिन् प्रश्ने दत्तचतुर्णां विकल्पानां मध्ये सर्वाधिकं उपयुक्तं विकल्पं चित्वा लिखन्तु। एतेषु केषुचित् प्रश्नेषु आन्तरिकः विकल्पः प्रदत्तः अस्ति। एतादृशेषु प्रश्नेषु दत्तविकल्पेषु एकस्य एव प्रयासः करणीयः।
5) B भागे प्र.सं. 21 तः 35 पर्यन्तम् – वस्तुनिष्ठप्रश्नाः। प्रत्येकं प्रश्नः अंकद्वयात्मकः अस्ति। ते यथानिर्देशं समाधेयाः।
6) C भागे प्र.सं. 36 तः 41 पर्यन्तम् अतिलघूत्तरियाः प्रश्नाः प्रत्येकम् अंकद्वयात्मकाः सन्ति। ते यथानिर्देशं समाधेयाः।
7) D भागे प्र.सं. 42 तः 47 पर्यन्तम् अनतिदीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् अंकत्रयात्मकाः सन्ति। ते यथानिर्देशं 50 शब्दानां परिधिमध्ये समाधेयाः।
8) E भागे प्र.सं. 48 तः 51 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः प्रत्येकम् पञ्च अंकात्मकाः सन्ति। ते यथानिर्देशं 80 तः 100 शब्दानां परिधिमध्ये समाधेयाः।
9) समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।
10) स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।
11) उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।
12) समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।
13) निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।
14) अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

**[A] प्रश्नसङ्ख्या १-२० बहुविकल्पप्रश्नाः सन्ति येषां कृते २० अङ्काः आवंटिताः भवन्ति। 1x20=20**

१. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ.मनुष्याणां शरीरस्थो महान् रिपुः कः।

(क) निद्रा (ख) तन्द्रा (ग) आलस्यम् (घ) क्रोधः।

ब. उन्नतिम् इच्छता पुरुषेण कति दोषा हातव्याः।

(क) चत्वारः (ख) पञ्च (ग) षट् (घ) सप्त।

२. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. हातव्याः इत्यत्र को धातुः।

(क) हा (ख) धि (ग) धा (घ) हि।

ब. दुर्जनस्य केन सह तुलना विहिता।

(क) मदेन (ख) ज्वरेण (ग) अङ्गारेण (घ) मूर्खेण।

३. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. हुतभुक् केन निवारयितुं शक्यते।

क) छत्रेण (ख) जलेन (ग) दण्डेन (घ) विविधैर्मन्त्रैः।

ब. कारयेत् इति रूपं कस्मिन् लकारे।

क) लिटि (ख) विधिलिङि (ग) आशीर्लिङि (घ) लृटि।

४. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. 'शशिदिवाकरयोर्ग्रहपीडनम्' इत्यस्मिन् श्लोके किं छन्दः।

(क) द्रुतविलम्बितम् (ख) शार्दूलविक्रीडितम् (ग) मालिनी (घ) रुचिरा।

ब. बुधजनसकाशात् इत्यत्र कः समासः।

(क) अव्ययीभावः (ख) षष्ठीतत्पुरुषः (ग) उपपदतत्पुरुषः (घ) द्वन्द्वः।

५. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. कस्याः नद्यास्तटे ब्रह्मस्थलाभिधः अग्रहारः विद्यते।

(क) भागीरथ्याः (ख) गोदावर्याः (ग) कावेर्याः (घ) कालिन्द्याः।

ब. मन्दारवत्याः कः पतिः भवितुं योग्यः।

(क) प्रथमः विप्रकुमारः (ख) द्वितीयः विप्रकुमारः (ग) तृतीयः विप्रकुमारः (घ) अग्निस्वामी।

६. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. यज्ञविषयाः मुख्यतया कस्मिन् वेदे विद्यन्ते।

(क) ऋग्वेदे (ख) सामवेदे (ग) यजुर्वेदे (घ) अथर्ववेदे।

ब. पुराणानां संख्या कति।

(क) दश (ख) एकादश (ग) पञ्चदश (घ) अष्टादश।

७. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. शास्त्रकाव्यस्य किम् उदाहरणम्।

(क) जानकीहरणम् (ख) रावणवधकाव्यम् (ग) किरातार्जुनीयम् (घ) शिशुपालवधम्।

ब. अजनि इति रूपं कस्मिन् लकारे कस्मिन् वचने च।

(क) लुङि प्रथमपुरुषैकवचने (ख) लङि प्रथमपुरुषैकवचने

(ग) लृङि मध्यमपुरुषैकवचने (घ) लृङि प्रथमपुरुषैकवचने।

८. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. त्रयः विप्रकुमाराः ब्राह्मणकन्यकायां दृष्टिम् आरोप्य किं व्रतम् आलम्ब्य स्थिताः।

(क) मौनव्रतम् (ख) मधुकरव्रतम् (ग) चकोरव्रतम् (घ) मुनिव्रतम्।

ब. मन्दारवती केन रोगेण दिवं गता।

(क) ज्वररोगेण (ख) यक्ष्मरोगेण (ग) कामरोगेण (घ) कर्कटरोगेण।

९. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. पुराणलक्षणमध्ये किं नास्ति।

(क) सर्गः (ख) अनुवंशः (ग) प्रतिसर्गः (घ) वंशानुचरितम्।

ब. 'प्रज्ञोपज्ञं तयोराद्यम्' इति कस्य वचनम्।

(क) भट्टतौतस्य (ख) भट्टनायकस्य (ग) मम्मटस्य (घ) अभिनवगुप्तस्य।

१०. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. 'वररुचिरीश्वरदत्तः' इति श्लोकः कस्य विषये।

(क) प्रकरणस्य (ख) भाणस्य (ग) व्यायोगस्य (घ) समवकारस्य।

ब. कृष्णविजयः इति कस्य उदाहरणम्।

(क) भाणस्य (ख) व्यायोगस्य (ग) समवकारस्य (घ) डिमस्य।

११. गद्यपद्यमयी इति वाक्यं कस्य विषये। 1

(क) महाकाव्यस्य (ख) शास्त्रकाव्यस्य (ग) चम्पूकाव्यस्य (घ) देवकाव्यस्य।

१२. मुखेन्दुनिक्षिप्तदृष्टयः इत्यत्र कः समासः। 1

(क) अव्ययीभावः (ख) तत्पुरुषः (ग) बहुव्रीहिः (घ) द्वन्द्वः।

१३. आत्मनः बुद्धिः कथम् उपमिता। 1

(क) रथिरूपेण (ख) रथरूपेण (ग) सारथिरूपेण (घ) प्रग्रहरूपेण।

१४. सर्वरसा अनुप्राप्ताः इत्यादिवाक्यं कुत्र उपलभ्यते। 1

(क) निरुक्ते (ख) पस्पशाह्निके (ग) छान्दोग्योपनिषदि (घ) मण्डलब्राह्मणे।

१५. कपिराजस्य सचिवः कः। 1

(क) हनुमान् (ख) रावणः (ग) बाली (घ) अङ्गदः।

१६. नानृग्वेदविनीतस्य इति श्लोकः कस्य उक्तिः। 1

(क) रामस्य (ख) लक्ष्मणस्य (ग) सुग्रीवस्य (घ) हनुमतः।

१७. श्रियः कुरूणाम् इति पद्यस्य रचयिता कः। 1

(क) द्वैपायनः (ख) कालिदासः (ग) माघः (घ) भारविः।

१८. जिगीषया इत्यस्य कः अर्थः। 1

(क) गातुम् इच्छया (ख) गन्तुम् इच्छया (ग) ग्रहीतुम् इच्छया (घ) जेतुम् इच्छया।

१९. अमुखः इत्यत्र कः समासः। 1

(क) अव्ययीभावः (ख) तत्पुरुषः (ग) बहुव्रीहिः (घ) द्वन्द्वः।

२०. अपदः इत्यत्र कः समासः। 1

(क) अव्ययीभावः (ख) तत्पुरुषः (ग) बहुव्रीहिः (घ) द्वन्द्वः।

**{B} प्रश्नसङ्ख्या २१वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति ३५-, तदर्थं ३० अङ्काः आवंटिताः भवन्ति।**

2x**15=30**

२१. अधोलिखितेषु रिक्तस्थानेषु मंजूषयां चित्वा उत्तरं ददातु। 2

अ. सौमित्रे इत्यनेन ...... सम्बोधितः। (रामः, लक्ष्मणः, सुग्रीवः, रावणः)

ब. वाक्यकुशलशब्देन ....... बोधः भवति। (हनुमतः, रामस्य, लक्ष्मणस्य, वाल्मीकेः)

२२. अधोलिखितेषु त्रिषु रिक्तस्थानेषु मंजूषयां चित्वा कस्यापि द्वयोः उत्तरं ददातु।

2

अ. हनुमतः व्याकरणपाण्डित्यविषये .......... इति उक्तिः। (अनेन बहुनाधीतम्/ अविस्तरमसन्दिग्धम्

/नानृग्वेदविनीतस्य/ तमभ्यभाष)

ब. ममान्तिकमिहागतः इत्यत्र अस्मच्छब्देन ........ ग्रहणम् भवति। (रामस्य/लक्ष्मणस्य/सुग्रीवस्य/ हनुमतः)

स.अरिन्दमशब्दस्यार्थः ........भवति। (वाङ्निपुणः/ सर्वशक्तिमान्/ शत्रुनाशकः/ दुःखदायकः)

२३. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

अ. ....... जगतीं जेतुं समीहते।

ब. रहस्यनुज्ञामधिगम्य इत्यत्र................इति सन्धिविच्छेदः भवति।

स............ वचः दुर्लभम्।

२४. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

अ.आददे इत्यत्र ......... लकारः अस्ति।

ब. महीभुजे इति ....... विशेषणम् अस्ति।

स.त्रिगणः इति पदेन ........... ग्रहणम्।

२५. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

अ.वाञ्छन् इति पदे ........... प्रत्ययः।

ब. अर्थान्तरन्यासः अलङ्कारः १९ अध्याये ........ श्लोके विद्यते।

स.निसर्गदुर्बोधम् इति श्लोके ........ अलङ्कारः।

२६. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

अ.संशृणुते इत्यत्र व्युत्पत्तिः अस्ति...........।

ब. इच्छतः इत्यत्र ............. धातुः ........... प्रत्ययः अस्ति।

स. २०अध्याये 'तथापि जिह्मः' इति श्लोके ............... छन्दः अस्ति।

२७. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

अ.निवृत्तकारणः इत्यत्र ............. समासः।

ब. २०अध्याये 'निरत्ययं साम' इति श्लोके .............अलङ्कारः।

स. २०अध्याये 'कृतारिषड्वर्गजयेन' इति श्लोके ............ अलङ्कारः।

२८. अधोलिखितेषु वाक्येषु कस्यापि द्वयोः सत्यं असत्यं च वाक्यं चिनोतु। 2

अ.**पुरषान्तराभिलाषिणी**-पुरुषान्तरस्य पतिभिन्नस्य अभिलाषिणी अभिलाषवती इति षष्ठीतत्पुरुषसमासः। (सत्यम्/असत्यम्)

ब. **ययाचे -** टु याचृ याच्ञायाम् इति धातोः लिटि प्रथमपुरुषैकवचनम्।(सत्यम्/असत्यम्)

स. **चकार** – डुकृञ् करणे इति धातोः लट् प्रथमपुरुषैकवचने रूपम्।(सत्यम्/असत्यम्)

२९. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. यः कविः शास्त्रीयविषयान् काव्यरूपेण प्रस्तौति स शास्त्रकविः।(सत्यम्/असत्यम्)

ब. यः कविः वचोवैचित्र्येण शास्त्रस्थस्य तर्ककर्कशस्य अर्थस्य शैथिल्यं सम्पादयति स उभयकविः।(सत्यम्/असत्यम्)

स. यः कविः स्वानुभवस्य आधारेण शास्त्रीयं विषयं तथा प्रस्तौति यथा शास्त्रीयरूपेण सह काव्यरूपमपि धरति स काव्यकविः।(सत्यम्/असत्यम्)

३०. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. स. यः कविः स्वानुभवस्य आधारेण शास्त्रीयं विषयं तथा प्रस्तौति यथा शास्त्रीयरूपेण सह काव्यरूपमपि धरति स काव्यकविः।(सत्यम्/असत्यम्)

ब. "चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते।" (सत्यम्/असत्यम्)

३१. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते। (सत्यम्/असत्यम्)

**ब.** चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः। स प्रसादः समस्तेषु रसेषु रचनासु च॥" (सत्यम्/असत्यम्)

**३२. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

**अ. हनुमांस्तौ = हनुमान् + तौ। (हल्-सन्धिः)। (सत्यम्/असत्यम्)**

**ब. पुनर्न = पुनः + न। (विसर्गसन्धिः)। (सत्यम्/असत्यम्)**

**३३. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

**अ. विनियोग एव सत्क्रिया येषां ते विनियोगसत्क्रियाः।(सत्यम्/असत्यम्)**

**ब. सम्यग्विनियोगसत्क्रिया = सम्यक् + विनियोगसत्क्रिया।(सत्यम्/असत्यम्)**

**३४. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

**अ. आजिरम् - "अङ्गनं चत्वराज्ञिरे" इत्यमरः।(सत्यम्/असत्यम्)**

**ब. देवमातृकः - "देशो नद्यम्बुवृष्ट्यम्बुसम्पन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्।।"इत्यमरः।(सत्यम्/असत्यम्)**

**३५. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

**अ. मन्त्रपदादिवोरगः= मन्त्रपदात् + इव + उरगः।(सत्यम्/असत्यम्)**

**ब. जनैरुदाहृतादनुस्मृताखण्डलसूनुविक्रमः = जनैः + उदाहृतात् + अनुस्मृताखण्डलसूनुविक्रमः। (सत्यम्/असत्यम्)**

1. **[C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत।** **2x6=12**

३६. सुग्रीवसचिवपदेन कस्य बोधः। वाक्यज्ञः इति पदं कस्य विशेषणम्। 2

अथवा

हनुमान् कीदृशं वाक्यम् उक्तवान्।

३७. प्लवगेश्वरम् इत्यत्र कः समासः कश्च विग्रहः। 2

३८. कः अशङ्किताकारम् उपैति। स कीदृशः सन् अशङ्किताकारम् उपैति। 2

३९. दुर्योधनस्य ईहितं कथं प्रतीयते। स कथं महीभृतां क्रिया वेद। 2

अथवा

युधिष्ठिरः किं वेदितुं वनेचरम् अयुङ्क्त।

४०. दुर्योधनः कदा कथं च व्यथते।
2

अथवा

द्रौपदी युधिष्ठिरम् उत्साहयितुं कदा किं कृतवती।

४१. कथाप्रसङ्गेनेति श्लोके कः अलङ्कारः। नताननः इत्यत्र कः समासः। 2

**[D] षट् अनतिदीर्घोत्तरैः समाधत्त। 3x6=18**

४२. 'ठठण्ठठण्ठं ठठठण्ठठण्ठः' इत्यादेः ध्वनेः कारणं सप्रसङ्गं वर्णयत। 3

४३. 'प्रावृट्समयप्रवासो' इति श्लोकं 'अविदग्धः' इति श्लोकं वा पूरयित्वा व्याख्यात। 3

४४. कविः इति विषयं सहृदयः इति विषयं वा समाश्रित्य स्वभाषया एकः निबन्धः लेख्यः। 3

४५. 'तत्तस्य वाक्यं निपुणं निशम्य' इति श्लोकं पूरयित्वा व्याख्यात। 3

४६. लक्ष्मणः हनुमन्तं प्रति किम् अवदत् इति सप्रसङ्गम् आलोचयत। 3

४७. दुर्योधनस्य प्रजारक्षणं कथमासीत्। 3

अथवा

दुर्योधनः किं किं कृत्वा धर्माचरणं करोति।

**[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20**

४८. 'पिपीलिका चुम्बति चन्द्रमण्डलम्' इति समस्यायाः 'पुरः पत्युः कामात् श्वशुरमियमालिङ्गति सती' इति समस्यायाः वा स्वभाषया पूर्तिपुरःसरं व्याख्यानं कुरुत। 5

४९. प्रतिभा इति विषयं काव्यम् इति विषयं वा समाश्रित्य स्वभाषया एकः निबन्धः लेख्यः। 5

५०. वक्रोक्त्यलङ्कारम् उपमालङ्कारं वा सोदाहरणं वर्णयत।
5

५१. युधिष्ठिरं प्रति द्रौपद्याः उत्साहप्रदीपकवचनोपन्यासं समासेन वर्णयत। 5

--)(O)(--

संस्कृतसाहित्यम् (Sanskrit) (248) MS

परीक्षासमयावधिः (Time) होरात्रयम् (3 Hrs) पूर्णाङ्काः (Full Marks) - 100

**[A] प्रश्नसङ्ख्या १-२० बहुविकल्पप्रश्नाः सन्ति येषां कृते २० अङ्काः आवंटिताः भवन्ति। 1x20=20**

१. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (ग) आलस्यम्

भ. (ग) षट्

२. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

(क) हा

भ. (ग) अङ्गारेण

३. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

आ. (ख) जलेन

भ. (ख) विधिलिङि

४. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

आ. (क) द्रुतविलम्बितम्

भ. (ख) षष्ठीतत्पुरुषः

५. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

आ. (घ) कालिन्द्याः।

ब. (क) प्रथमः विप्रकुमारः

६. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (ग) यजुर्वेदे

भ. (घ) अष्टादश।

७. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (ख) रावणवधकाव्यम्

भ. (क) लुङि प्रथमपुरुषैकवचने

८. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

आ. (ग) चकोरव्रतम्

भ.  (क) ज्वररोगेण

९. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

अ. (ख) अनुवंशः

भ. (क) भट्टतौतस्य

१०. अधोलिखितेषु प्रश्नेषु कस्यापि एकस्य उत्तरं ददातु : 1

आ. (ख) भाणस्य

भ. (घ) डिमस्य।

११. (ग) चम्पूकाव्यस्य

१२. (ग) बहुव्रीहिः

१३. (ग) सारथिरूपेण

१४. (क) निरुक्ते

१५. (क) हनुमान्

१६. (क) रामस्य

१७. (घ) भारविः।

१८. (घ) जेतुम् इच्छया।

१९. (ग) बहुव्रीहिः

२०. (ग) बहुव्रीहिः

**{B} प्रश्नसङ्ख्या २१वस्तुनिष्ठप्रश्नाः सन्ति। प्रत्येकं प्रश्नं द्वयोः अङ्कयोः भवति ३५-, तदर्थं ३० अङ्काः आवंटिताः भवन्ति। 2x15=30**

२१. अधोलिखितेषु रिक्तस्थानेषु मंजूषयां चित्वा उत्तरं ददातु। 2

आ. लक्ष्मणः

भ. हनुमतः

२२. अधोलिखितेषु त्रिषु रिक्तस्थानेषु मंजूषयां चित्वा कस्यापि द्वयोः उत्तरं ददातु। 2

अ. अनेन बहुनाधीतम्

भ. रामस्य

स. शत्रुनाशकः

२३. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

अ. सुयोधनः

भ. रहसि अनुज्ञाम् अधिगम्य

ह. हितकरं मनोहारि च

२४. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

आ. लिट्

भ. युधिष्ठिरस्य

ह. धर्मार्थकामानाम्

२५. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

आ. शतृप्रत्ययः

भ. कृतप्रणामस्य इति

ह. (ग) विषमः

२६. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

आ. सम्-श्रु+लट् प्रथमपुरुषैकवचनम्

भ. इष्-धातुः शतृप्रत्ययः

ह. वंशस्थविलम्

२७. अधोलिखितेषु त्रिषु रिक्तस्थानेषु कस्यापि द्वयोः उत्तरं ददातु। 2

आ. बहुव्रीहिः

भ. एकावली

स. परिकरः

२८. अधोलिखितेषु वाक्येषु कस्यापि द्वयोः सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. सत्यम्

ब. सत्यम्

स. असत्यम्

२९. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. सत्यम्

ब. असत्यम्

स. असत्यम्

३०. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. असत्यम्

ब. सत्यम्

३१. अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु। 2

अ. सत्यम्

ब. असत्यम्

३२. **अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

अ. सत्यम्

ब. सत्यम्

३३. **अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

अ. सत्यम्

ब. असत्यम्

३४. **अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।** 2

अ. सत्यम्

ब. सत्यम्

३५. **अधोलिखितेषु वाक्येषु सत्यं असत्यं च वाक्यं चिनोतु।**

अ. सत्यम्

ब. सत्यम्

2. **[C] षण्णां प्रश्नानां यथानिर्देशम् उत्तराणि लिखत।** **2x6=12**

३६. सुग्रीवसचिवपदेन पवनात्मजस्य हनुमतो बोधः। वाक्यज्ञः इति पदं सौमित्रेः लक्ष्मणस्य विशेषणम्। 2

अथवा

सुग्रीवस्य सचिवः अयं हनुमान् महान् ज्ञानी अस्ति। वाक्यप्रयोगे अस्य प्रविण्यमस्ति इत्यादिकम्।

३७. प्लवगेश्वरम् इत्यत्र षष्ठीतत्पुरुषसमासः। प्लवगानाम् ईश्वरः प्लवगेश्वरः, तमिति विग्रहः। 2

३८. दुर्योधनः अशङ्कितकाकारम् उपैति। स शत्रूणां बलस्य आधिक्यात् शङ्कितः सन् अशङ्किताकारम् उपैति 2

३९. दुर्योधनस्य ईहितं विधातुः ईहितम् इव फलैः प्रतीयते। स सच्चरितैः चरैः सर्वेषां महीभृतां क्रिया वेद। 2

अथवा

कुरूणामधिपस्य श्रियः पालनीं प्रजासु वृत्तिं वेदितुं यमयुङ्क्त। इत्यादिकम्।

४०. कथाप्रसङ्गेन जनैः उदाहृतात् युधिष्ठिरादेः अभिधानाद् दुर्योधनः स्मृतगरुडविक्रमः सर्पः इव व्यथते। 2

अथवा

द्रौपद्या युधिष्ठिरं प्रति उक्तानि प्रेरणा वाक्यानि षट्वाक्येषु-

क) व्रजन्ति ते मूढधियः पराभव, इत्यादीनि।

ख) जटाधरस्सन् जुहुधीह पावकम् इत्यादिकम्

४१. कथाप्रसङ्गेन इति श्लोके उपमालङ्कारः। नताननः इत्यत्र नतम् आननं यस्य स इति बहुव्रीहिसमासः। 2

**[D] षट् अनतिदीर्घोत्तरैः समाधत्त।** **3x6=18**

४२. 'ठठण्ठठण्ठं ठठठण्ठठण्ठः' इत्यादेः ध्वनेः कारणं

क) 'ठठण्ठठण्ठं ठठठण्ठठण्ठः' इति श्लोकः।

ख) अन्वयार्थः।

ग) भावार्थे 'ठठण्ठठण्ठं ठठठण्ठठण्ठः' इत्यस्य कारणवर्णनम्। 3

४३. 'प्रावृट्समयप्रवासो' इति श्लोकं 'अविदग्धः' इति श्लोकं वा

क) 'प्रावृट्समयप्रवासो' इति सम्पूर्णः श्लोकः।

ख) सान्वयार्थः।

ग) भावार्थः

अथवा

क) 'अविदग्धः' इति श्लोकः।

ख) सान्वयार्थः।

ग) भावार्थः। 3

४४. कविः इति विषयं सहृदयः इति विषयं वा समाश्रित्य स्वभाषया एकः निबन्धः

क) अपारे इति कविसम्बन्धी श्लोकः।

ख) कविवैशिष्ट्यम्।

ग) काव्यमीमांसादिशा कविभेदाः।

अथवा

क) सहृदयलक्षणम्।

ख) सहृदयवैशिष्ट्यम्।

ग) अभिनवगुप्तदिशा सहृदयगुणाः। 3

४५. 'तत्तस्य वाक्यं निपुणं निशम्य' इति श्लोकं

क) 'तत्तस्य वाक्यं निपुणं निशम्य' इति सम्पूर्णः श्लोकः।

ख) सान्वयार्थः।

ग) भावार्थः। 3

४६. लक्ष्मणः हनुमन्तं प्रति किम् अवदत् इति सप्रसङ्गम्
रामवचनात् हनुमतः माहात्म्यं ज्ञानात् परं लक्ष्मणस्य वाक्यानि।

क) सुग्रीवमाहात्म्यज्ञानम्।

ख) रामेण सह सख्याय सुग्रीवेण हनुमतः प्रेरणम् इत्यादिक्रमेण षट् वाक्यानि। 3

४७. दुर्योधनस्य प्रजारक्षणं

क) कृत्रिमजलप्रवाहादिना कृषिकार्ये सुलभता।

ख) सद्गुणैः प्रजारक्षणम् इत्यादिविषये षड् वाक्यानि। 3

अथवा

दुर्योधनस्य धर्माचरण संबन्धीनि षट् वाक्यानि।

क) मखादिविधानम्

ख) प्रजासेवनम् इत्यादीनि

**[E] चत्वारः दीर्घोत्तरैः समाधेयाः। 5x4=20**

४८. 'पिपीलिका चुम्बति चन्द्रमण्डलम्' इति समस्यायाः 'पुरः पत्युः कामात् श्वशुरमियमालिङ्गति सती' इति समस्यायाः वा

क) 'पिपीलिका चुम्बति चन्द्रमण्डलम्' इति समस्याश्लोकः अर्थश्च।

ख) अन्वयार्थः।

ग) भावार्थः।

घ) व्याकरणविशेषः।

अथवा

क) 'पुरः पत्युः कामात् श्वशुरमियमालिङ्गति सती' इति समस्याश्लोकः अर्थश्च।

ख) अन्वयार्थः।

ग) भावार्थः।

घ) व्याकरणविशेषः। 5

४९. प्रतिभा इति विषयं काव्यम् इति विषयं वा

भट्टतौत-भामह-वामनाभिनवगुप्त-जगन्नाथ-राजशेखरादिदिशा प्रतिभास्वरूपम् आश्रित्य दश वाक्यानि। 5

५०. वक्रोक्त्यलङ्कारम् उपमालङ्कारं वा

क) वक्रोक्त्यलङ्कारलक्षणम्।

ख) लक्षणार्थः।

ग) उदाहरणे समन्वयः।

अथवा

क) उपमालक्षणम्।

ख) लक्षणार्थः।

ग) उदाहरणे लक्षणसमन्वयः। 5

५१. युधिष्ठिरं प्रति द्रौपद्याः उत्साहप्रदीपकवचनोपन्यासं

युधिष्ठिरं प्रति द्रौपद्याः उत्साहप्रदीपक-वचनोपन्यासः -निशम्य सिद्धिमित्यारभ्य व्रजन्ति ते मूढधियः श्लोकपर्यन्तं दश वाक्यानि। 5

--)(O)(--